इत्युक्तेः। वामं लिहन् सृक्कमरण्यघूर्णं इति वसन्तराजप्रयोगाच्च।" इति भरतः॥

सृक्कं; क्ली, ओष्ठप्रान्तभागः। इति वसन्तराजप्रयोगः। इत्यमरटीकायां भरतः॥

सृक्कणी,स्त्री,ओष्ठप्रान्तभागः। कस इति भासा। इति पाणिनिः। इत्यमरटीकायां भरतः। २। ६। ९१॥

सृक्कि, क्ली, ओष्ठयोः प्रान्तभागः। इत्यरुणः। इत्यमरटीकायां भरतः। २। ६। ९१॥

सृक्किणी, स्त्री, ओष्ठयोरन्तरम्। इति राजनिर्घण्टः॥

सृगः, पुं, (सरतीति। सृ+बाहुलकात् गक्।) भिन्दिपालः। इत्यमरः। २। ८। ९१॥

सृगालः,पुं,(सृजति मायामिति। सृज्+बाहुलकात् कालन्। न्यङ्क्वादित्वात् कुत्वम्।)जम्बुकः। इति शब्दरत्नावली॥दैत्यविशेषः। इति केचित्॥

सृङ्का, स्त्री,शब्दवती रत्नमयी माला। यथा,—

"तमब्रवीत् प्रीयमाणो महात्मा
वरं तवेहाद्य ददामि भूयः।
तवैव नाम्ना भवितायमग्निः
सृङ्कां चेमामनेकरूपां गृहाण॥"

इति कठोपनिषदि प्रथमा वल्ली॥

"सृङ्कां शब्दवतीं रत्नमयीं मालां इमामनेकरूपां विचित्रां गृहाण स्वीकुरु। सृङ्कां वाकुत्सितां गतिं कर्म्ममयीं गृहाण। अन्यदपि कर्म्मविज्ञानमनेकहेतुत्वात् स्वीकुर्व्वित्यर्थः।" इत्यादिशाङ्करभाष्यम्॥

सृज, श्री श विसर्गे। इति कविकल्पद्रुमः॥(तुद॰ पर॰-सक॰-अनिट्।) श्री, अस्राक्षीत्। श, सृजति। इति दुर्गादासः॥

सृज, य ङ श्री विसर्गे। इति कविकल्पद्रुमः॥ (दिवा॰-आत्म॰-सक॰-अनिट्।)य ङ,सृज्यते। श्री, स्रष्टा। सरीसृज्यते। विसर्गस्त्यागः। त्यागो व्युद्वां पर एव अन्यत्र करोतीत्यर्थः। यथा। उपासनामेत्य पितुः स्म सृज्यते इति नैषधम्॥ संपूर्व्वोऽयमकर्म्मकः। यथा। संसृज्यते सरसिजैररुणांशुभिन्नैः निशापरिणामवायुरिति रघुः। इति दुर्गादासः॥

सृजकाक्षारः, पुं, सर्ज्जिकाक्षारः। इत्यमरटीकायां रमानाथः॥

सृणिः,पुं,(सरतीति। सृ+"सृविषिभ्यां कित्।" उणा॰ ४। ४९। इति निः। सच कित्। णत्वञ्च।) शत्रुः। इति शब्दमाला॥

सृणिः, स्त्री, (सृ+निः। णत्वञ्च।) अङ्कुशः। इत्यमरः। २। ८।४१॥ (सृणिद्वयोरित्युणादिवृत्तौ उज्ज्वलदत्तः॥ तथा च शिशुपालवधे। ५। ५।

"आरचमग्नमवमत्य सृणिं सिताग्रमेकः पलायत जवेन कृतार्त्तनादः॥")

सृणिका, स्त्री, लाला। इत्यमरः। २। ६।६७॥

सृणी, स्त्री, (सृणि+कृदिकारादिति ङीष्।) अङ्कुशः। इत्यमरः। २। ८। ४१॥

सृणीका, स्त्री,लाला। इत्यमरटीकायां रामाश्रमः। २। ६। ६७॥

सृतः, त्रि, (सृ+क्तः।) गतः। (यथा, महाभारते। ९। २३। २९।

"गान्धारराजस्तु पुनर्वाक्यमाह ततो बली।
निवर्त्तध्वमधर्म्मज्ञा युध्यध्वं किं सृतेन वः॥")

सृतिः, स्त्री, (सृ+क्तिन्।) गमनम्। मार्गः। इति मेदिनी॥ (यथा, गीतायाम्। ८। २७।

"नैते सृती पार्थ जानन् योगी मुह्यति कश्चन।
तस्मात् सर्व्वेषु कालेषु योगयुक्तो भवार्ज्जुन॥"*

जन्म। इति स्वामी॥ यथा, भागवते। १०। ६०। ४३।

"स्यान्मे तवाङ्घ्रिवरणं सृतिभिर्भ्रमन्त्या
यो वै भजन्तमुपयात्यनृतापवर्गः॥"

निर्म्माणम्। यथा, भागवते। ३। २। १३।

"कात्स्न्र्येन चाद्येह गतं विधातुरर्व्वाक्सृतौ कौशलमित्यमन्यत॥"

"अर्व्वाक्सृतौ अर्व्वाचीनसंसारनिर्म्माणे मनुष्यनिर्म्माणे वा।" इति तट्टीका॥)

सृत्वरः,त्रि,(सरति तच्छीलः। सृ गतौ+"इन्नशजिसर्त्तिभ्यः करप्।" ३। २। १६३। इति करप्।) गमनकर्त्ता। सृधातोः क्वरप्प्रत्यये तनागमेन निष्पन्नः। इति मुग्धबोधव्याकरणम्॥

सृत्वरी,स्त्री,(सृ+करप्। सृ+क्वनिप्। ङीप्।) माता। इति संक्षिप्तसारोणादिवृत्तिः॥ गमनकर्त्री। इति मुग्धबोधव्याकरणम्॥

सृत्वा, [न्]पुं,(सृ गतौ+"शीङ्क्रुशीरुहीति।" उणा॰ ४। ११३। इति क्वनिप्।) विसर्पः। बुद्धिः। प्रजापतिः। इति संक्षिप्तसारोणादिवृत्तिः॥

सृदरः, पुं, (दॄ विदारणे+"कृदरादयश्च।" उणा॰ ५। ४१। इति अच्प्रत्ययेन निपातनात् साधुः।) सर्पः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

सृदाकुः, पुं, (सरतीति। सृ+"सर्त्तेर्दुक् च।" उणा॰ ३। ७८। इति काकुर्दुगागमश्च।) वायुः। वज्रम्। अग्निः। प्रतिसूर्य्यकः। इति मेदिनी॥मृगः। इति संक्षिप्तसारोणादिवृत्तिः॥

सृदाकुः, स्त्री,(सरतीति। सृ गतौ+काकुर्दुगागमश्च।) नदी। इत्युणादिकोषः॥

सृप,सृ श्री गत्याम्। इति कविकल्पद्रुमः॥(भ्वा॰-पर॰-सक॰-अनिट्।) सृ,असृपत्। अस्य सृदित्वेऽपि कृषमृशस्पृश इति विशेषविधानात् पक्षे व्यां सिः तेन असार्प्सीत् अस्राप्सीत् इत्यपि। श्री, सर्प्ता। इति दुर्गादासः॥

सृपाटः, पुं, सृपाटी। इति स्त्रीपुंलिङ्गसंग्रहटीकायां भरतः। ३। ५। ३८॥

सृपाटिका, स्त्री, चञ्चुः। इति हेमचन्द्रः॥

सृपाटी, स्त्री. (सृपाट+गौरादित्वात् ङीष्।) परिमाणभेदः। इति स्त्रीपुंलिङ्गसंग्रहटीकायां भरतः। ३।५।३८॥ रक्तधारा। इति तत्रैव गोवर्द्धनः॥

सृप्रः, पुं, (सृप गतौ+"स्फायितञ्चिवञ्चीति।" उणा॰ २। १३। इति रक्।) चन्द्रः। इत्युणादिकोषः॥

सृफ,उ हिंसे। इति कविकल्पद्रुमः॥(भ्वा॰-पर॰-सक॰-सेट्। क्त्वावेट्।) सप्तमस्वरी। उ, सर्फित्वा सृफ्त्वा। इति दुर्गादासः॥

सृमरः, पुं,(सरति तच्छीलः। सृ गतौ+"सृघस्यदः क्मरच्।" ३।२।१६०। इति क्मरच्।) पशुविशेषः। इत्यमरः। २। ५। ११॥ बालमृगः। इति केचित्॥ (यथा, रामायणे। ३। १०३। ४२।

"वराहमृगसिंहाश्च महिषाः सृमरास्तथा।
व्याघ्रगोकर्णगवया वित्रेसुः पृषतैः सह॥"

सृष्टं, त्रि, (सृज्+क्तः।) निर्म्मितम्। युक्तम्। निश्चितम्। बहुलम्। इति मेदिनी॥ भूषितम्। इत्यजयः॥ त्यक्तम्। (यथा, रामायणे। २। ३५। १५।

"महाब्रह्मर्षिसृष्टा वा ज्वलन्तो भीमदर्शनाः।
धिक्वाग्दण्डा न हिंसन्ति रामप्रव्राजने स्थिताम्॥")

सृष्टिः स्त्री,(सृज्+क्तिन्।)निर्म्मितिः। स्वभावः। इति मेदिनी॥ निर्गुणः इति शब्दरत्नावली॥* ब्रह्माण्डसृष्टिर्यथा। सृष्टेः पूर्व्वं मनश्चक्षुराद्यगोचरो भगवान् एक एवासीत्। यदा स स्वेच्छया द्रष्टा सन् दृश्यं नापश्यत् तदा त्रिगुणमयीं मायां प्रकाशयामास। ततो भगवान् स्वांशेन पुरुषरूपं कृत्वा तस्यां मायायां स्ववीर्य्यं चैतन्यं आधत्त। सा समष्टिजीवरूपं महत्तत्त्वं जनयमास। तस्मात् त्रिविधोऽहङ्कारो जातः तत्र सात्त्विकाहङ्कारात् मनइन्द्रियाधिष्ठातृदेवताश्च जाताः। राजसाहङ्कारात् दशेन्द्रियाणि जातानि। तामसाहङ्कारात् पञ्च महाभूतानि तेषां पञ्च गुणाश्च जाताः। एवं प्रकृत्यादिभिरेतैश्चतुर्विंशतितत्त्वै र्ब्रह्माण्डंनिर्म्माय भगवान् तस्मिन्नेकेनांशेन प्रविश्य गर्भोदकसंज्ञकं जलं ससर्ज। तज्जलमध्ये योगनिद्रया सहस्रयुगमितं कालं स्थितवान्। तदन्ते उत्थाय स्वयमंशेन ब्रह्मा भूत्वा सर्व्वान् सृष्ट्वा नानावतारान् कृत्वा पालयति। कल्पान्ते रुद्ररूपेण संहरति च। इति श्रीभागवतमते संक्षेपसृष्टिः॥ * ॥ अपि च।

"स्थावरान्ताः सुराद्यास्तु प्रजा ब्रह्मंश्चतुर्व्विधाः।
ब्रह्मणः कुर्व्वतः सृष्टिं जज्ञिरे मानसीस्तु ताः॥
ततो देवासुरपितॄन् मनुष्यांश्च चतुष्टयम्।
सिसृक्षुरम्भांस्येतानि स्वमात्मानमयूयुजत्॥
युक्तात्मनस्तमोमात्रा उद्रिक्ताभूत् प्रजापतेः।
सिसृक्षोर्जघनात् पूर्व्वमसुरा जज्ञिरे ततः॥
उत्ससर्ज ततस्तान्तु तमोमात्रात्मिकां तनुम्।
सा तु त्यक्ता तनुस्तेन मैत्रेयाभूद्विभावरी॥
सिसृक्षुरन्यदेहस्थः प्रीतिमाप ततः सुराः।
सत्त्वोद्रिक्ताः समुद्भूता मुखतो ब्रह्मणो द्विज॥